# दशमः पाठः

# शिक्षानुशासनम् ।

## पाठप्रवेशः

'सत्यमेव जयते', 'अहं ब्रह्मास्मि', 'तत्त्वमसि' इत्यादीनि सूक्तानि भवन्तः पूर्वं श्रुतवन्तः किल ? एतानि सूक्तानि अस्मत्संस्कृतेः दिशासूचकानि भवन्ति । वाक्यानीमानि उपनिषत्सु वर्तन्ते । विविधानां संस्थानां ध्येयवाक्यत्वेन स्वीकृतानि इमानि । प्रसिद्धाः काश्चन अन्याः सूक्तीः परिचिनुमः ।

## आमुखम्

संस्कृतसाहित्यं वैदिकं लौकिकं चेति द्विविधं भवति । लौकिकसाहित्ये महाकाव्यनाटकादीनि प्रसिद्धानि भवन्ति । वैदिकसाहित्ये वेदाः वेदाङ्गानि उपनिषदः च प्रसिद्धानि। महाकाव्येभ्यः स्वीकृतानि कानिचन सुभाषितानि पूर्वस्मिन् पाठे पठितवन्तः। इदानीं वेदानाम् अन्तः इत्यर्थे वेदान्त इति प्रसिद्धाम् उपनिषदं परिचिनुमः । ईशम्, केनम्, कठम्, प्रश्नम्, मुण्डकम्, माण्डूक्यम्, तैत्तिरीयम्, ऐतरेयम्, छान्दोग्यम्, बृहदारण्यकम् च प्रसिद्धाः दशोपनिषदः। पूर्विकाणाम् ऋषिवर्याणां दर्शनान्येव उपनिषत्सु प्रतिपादितो विषयः। तैत्तिरीयोपनिषदः शिक्षावल्लीतः कश्चन अंशः पाठभागत्वेन स्वीकृतः।



**गुरुकुले वसन् शिष्यः विद्याभ्यासं परिसमाप्य गुरुदक्षिणां दातुकामः आचार्यमुपगम्य अवदत्।**

शिष्यः - भोः आचार्य! अभिवादये। ममाध्ययनं समाप्तम् इति भवता उक्तम्। अतः गृहं गन्तुकामोऽहं भवते दक्षिणां प्रदातुमिच्छामि।

आचार्यः - वत्स! दीर्घायुर्भव। भवादृशानां शिष्याणां स्नेहः एव अस्मादृशानाम् आचार्याणां दक्षिणा।

शिष्यः - एवं चेत् मया किं करणीयम् इति उपदिशतु।

आचार्यः - शिष्य ! त्वं सर्वदा **सत्यं वद। धर्मं चर।** त्वया **स्वाध्यायान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्।**

शिष्यः - अस्तु अहं मातापितरौ द्रष्टुं त्वरयामि।

| | | |
|---|---|---|
| आचार्यः | - | भवतु वत्स ! त्वं **मातृदेवो भव। पितृदेवो भव।** अपि च **आचार्यदेवो भव। अतिथिदेवो भव।** |
| शिष्यः | - | बाढम् । अहमाचार्यं यथातथमनुतिष्ठामि । |
| आचार्यः | - | मैवम् । **यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि ।** |
| शिष्यः | - | मया आर्जितानि सर्वाणि इतरेभ्यः दातुमिच्छामि । |
| आचार्यः | - | वत्स! यत् ददासि तत् **श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् ।** |
| शिष्यः | - | अस्तु । इतःपरं विचिकित्सा भविष्यति चेत् कथं परिहार्यम् ? |
| आचार्यः | - | संशयश्चेत् निस्वार्थिनं शमधनयुक्तम् आचार्यमुपगम्य संशयनिवृत्तिं कुरु । **एष आदेशः। एष उपदेशः। एतदनुशासनम् ।** शुभास्ते सन्तु पन्थानः।। |

## पदच्छेदः

| | | |
|---|---|---|
| दीर्घायुर्भव | - | दीर्घायुः + भव । |
| धर्मान्न | - | धर्मात् + न । |
| त्वयोपास्यानि | - | त्वया+ उपास्यानि । |
| यान्यस्माकं | - | यानि + अस्माकम् । |
| यान्यनवद्यानि | - | यानि+ अनवद्यानि । |
| वाक्यानीमानि | - | वाक्यानि + इमानि। |
| गन्तुकामोऽहम् | - | गन्तुकामः + अहम् । |
| संशयश्चेत् | - | संशयः + चेत् । |
| शुभास्ते | - | शुभाः + ते । |
| ममाध्ययनम् | - | मम + अध्ययनम् । |
| अश्रद्धयाऽदेयम् | - | अश्रद्धया + अदेयम् । |

**विग्रहः**

| | | |
|---|---|---|
| आचार्यः | - | आचारं ग्राहयति इति आचार्यः । |
| मातापितरौ | - | माता च पिता च । |
| मातृदेवः | - | माता देवो यस्य सः । (एवं पितृदेवः, आचार्यदेवः, अतिथिदेवः।) |
| लौकिकम् | - | लोके विदितम् । (लोके भवम्) |
| वैदिकम् | - | वेदे विदितम् । (वेदे भवम्) |
| निस्स्वार्थम् | - | स्वस्मै अर्थं स्वार्थम्, निर्गतं स्वार्थं यस्मात् सः निस्स्वार्थः तम् । |

## पठनप्रवर्तनानि



**पाठभागस्थम् आचार्यशिष्ययोः संभाषणं भावानुसारम् अवतारयतु ।**

**श्रद्धेयाः अंशाः**

प्रश्नवाचकशब्दानां प्रयोगः ।

अवतरणशैली ।

भावानुसारम् अवतारणम् ।



**उदाहरणानुसारं क्रियापदं परिवर्त्य लिखतु ।**

उदा – <u>**भवान्**</u> सत्यं वदतु ।

<u>**त्वं**</u> सत्यं वद ।

क) भवान् धर्मं चरतु ।

ख) भवान् आयुष्मान् भवतु ।

ग) भवान् सम्यक् पठतु

**श्रद्धेयौ अंशौ**

उचितक्रियापदस्य स्वीकरणम् ।

वाक्यशुद्धिः।

## विविधानां संस्थानां तेषां ध्येयवाक्यानां च पट्टिकां करोतु।

| **ध्येवाक्यम्** | | **संस्था** |
|---|---|---|
| योगक्षेमं वहाम्यहम् | - | एल्. ऐ. सि । |
| ........................ | - | ............................... । |
| ........................ | - | ............................... । |
| ........................ | - | ............................... । |
| ........................ | - | ............................... । |

**श्रद्धेयौ अंशौ**

चयनसामर्थ्यम्।

पट्टिकाकरणम्।

## सूचनानुसारं लघूपन्यासं लिखतु।

**सूचना – वैदिकसाहित्यं – वेद-वेदाङ्गानि- उपनिषदः- संस्कृतेः सूचकानि- ध्येयवाक्यानि।**

**श्रद्धेयाः अंशाः**

सर्वेषां सूचकानां स्वीकारः।

भाषाशुद्धिः।

उपन्यासघटना।



**वेदाः- वेदाङ्गानि – उपनिषदः पट्टिकारूपेण लिखतु।**

ऋक्, प्रश्नम्, साम, शिक्षा, कल्पम्, कठम्, व्याकरणम्, बृहदारण्यकम्
निरुक्तम्, ज्योतिषम्, ईशम्, अथर्वः, केनम्, मुण्डकम्, माण्डूक्यम्,
यजुः, तैत्तिरीयम्, छन्दः, ऐतरेयम्, छान्दोग्यम्।

| वेदाः | वेदाङ्गानि | उपनिषदः |
|---|---|---|
| | | |

**श्रद्धेयः अंशः**

पट्टिकाकरणसामर्थ्यम्।

## अधिकविस्तरः

**मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव।** - माता, पिता, आचार्यः,अतिथिश्च एते देवतावदुपास्याः इत्यर्थः।

**यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि** - अस्माकम् आचार्याणां शोभनचरितानि आम्नायाद्यविरुद्धानि यानि कर्मणि तानि एव त्वया नियमेन कर्तव्यानि-इत्याशयः।

**यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि।**- अनिन्दितानि शिष्टाचारलक्षणानि कर्माणि कर्तव्यानि अवद्यानि इतराणि न कर्तव्यानि।

**श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्।** - यत् किञ्चित् दातव्यं तत् श्रद्धया दातव्यम्, अश्रद्धया न दातव्यम्। श्रिया- विभूत्या दातव्यम् - अधिकं दातुं नास्तीत्यतः लज्जया देयम्। न्यूनं जातं वा इति भीत्या देयम्। संविदा देयम्- मैत्र्यादिकार्येण सम्भाषया देयम्।

**कर्तरि - कर्मणि प्रयोगौ**

मया किं करणीयम्। - कर्तरि।

अहं किं करवाणी। - कर्मणि।

# शब्दकोशः।

| संस्कृतम् | संस्कृतम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| अवद्यम् | दोषयुक्तम् | ദോഷത്തോട് കൂടിയത് | ದೋಷವಿರುವ | Infallible |
| आलस्यम् | तन्द्रा | മടി | ಉದಾಸೀನ | Laziness |
| तपः | तीव्रयत्नः | കഠിനപ്രയത്നം | ಕಠಿಣ ಯತ್ನ | Intense effort |
| तिक्तरसः | रसविशेषः | കയ്പ് രസം | ಕಹಿರಸ | Bitter |
| तृष्णा | अभिलाषः | ആഗ്രഹം | ಆಸೆ | Desire |
| दुकूलम् | कौशेयम् | പട്ടുവസ്ത്രം | ರೇಷ್ಮೆ ಉಡುಗೆ | Silk |
| निस्सारम् | साररहितम् | കഴമ്പില്ലാത്ത | ರಸವಿಲ್ಲದ | Trivial |
| परः | अन्यः | മറ്റൊരാൾ | ಇನ್ನೊಬ್ಬ | Another |
| पिपीलकः | पीलकः | ഉറുമ്പ് | ಇರುವೆ | Ant |
| पुराणम् | प्राचीनम् | പഴയത് | ಹಳೆಯದು | Old |
| मूढः | अज्ञः | അറിവില്ലാത്തവൻ | ಮೂರ್ಖ | The fool |
| लुब्धः | अभिलाषयुक्तः | കൊതിയുള്ളവൻ | ಅತಿಯಾಸೆ ಇರುವವನು | Greedy |
| वल्कलः | वृक्षत्वक् | മരവുരി | ಮರದ ತೊಗಟೆ | Tree bark |
| विचिकित्सा | सन्देहः | സംശയം | ಸಂದೇಹ | Doubt |
| विमुखः | विरतः | പിന്തിരിഞ്ഞവൻ | ವಿಮುಖ | Averse |
| वैनतेयः | गरुडः | ഗരുഡൻ | ಗರುಡ | The Garuda |
| शमः | विकारराहित्यम् | നിർവ്വികാരത | ವಿಕಾರವಿಲ್ಲದ ಅವಸ್ಥೆ | Insensitivity |
| संवित् | सम्भाषा | സംഭാഷണം | ಸಂಭಾಷಣೆ | Conversation |
| सन्तः | सज्जनाः | സജ്ജനങ്ങൾ | ಸಜ್ಜನರು | Gentlemen |
| समीक्ष्य | सन्दृश्य | കണ്ടിട്ട് | ನೋಡಿ | Having seen |
| सहसा | झटिति | പെട്ടെന്ന് | ಬೇಗನೆ | Suddenly |
| ह्री | लज्जा | ലജ്ജ | ಲಜ್ಜೆ | Shame |

## किमधिगतम्

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| श्लोकं सतालम् आलपति। | | | |
| श्लोकस्य अन्वयम्, आशयं च लिखति। | | | |
| आस्वादनटिप्पणीं रचयति। | | | |
| सुभाषितसम्पुटं निर्माति। | | | |
| सन्दर्भानुसारं सम्भाषणां रचयति। | | | |
| वाक्यं मध्यमपुरुषरूपे लिखति। | | | |
| ध्येयवाक्यानां पट्टिकां लिखति। | | | |
| लघूपन्यासं लिखति। | | | |
| वेदवेदाङ्गोपनिषदां पट्टिकां लिखति। | | | |